॥श्रीः॥

## ॥ प्रार्थना ॥

ॐकारं बिन्दुसंयुक्तं
नित्यं ध्यायन्ति योगिनः ।
कामदं मोक्षदं चैव
ॐकाराय नमो नमः ॥१॥

गुरुर्ब्रह्मा गुरुर्विष्णुः
गुरुर्देवो महेश्वरः ।
गुरुस्साक्षात् परं ब्रह्म
तस्मै श्रीगुरवे नमः ॥२॥

गुरुरेव गतिः गुरुमेव भजे
गुरुणैव सहास्मि नमो गुरवे ।
न गुरोः परमं शिशुरस्मि गुरोः
मतिरस्ति गुरौ मम पाहि गुरो ॥३॥

कार्तस्वरनिभदेहः
कीर्तनमात्रेण धूतसकलाघः ।
आर्तस्वरजनशरणं
मूर्तदयारूप गुरुवरेण्यो व्यात् ॥४॥

सदात्मध्याननिरतं
विषयेभ्यः पराङ्मुखम् ।
नौमि शास्त्रेषु निष्णातं
चन्द्रशेखरभारतीम् ॥५॥

## ॥ prārthanā ॥

oṃkāraṃ bindusaṃyuktaṃ
nityaṃ dhyāyanti yoginaḥ ।
kāmadaṃ mokṣadaṃ caiva
oṃkārāya namo namaḥ ॥1॥

gururbrahmā gururviṣṇuḥ
gururdevo maheśvaraḥ ।
gurussākṣāt paraṃ brahma
tasmai śrīgurave namaḥ ॥2॥

gurureva gatiḥ gurumeva bhaje
guruṇaiva sahāsmi namo gurave ।
na guroḥ paramaṃ śiśurasmi guroḥ
matirasti gurau mama pāhi guro ॥3॥

kārtasvaranibhadehaḥ
kīrtanamātreṇa dhūtasakalāghaḥ ।
ārtasvarajanaśaraṇaṃ
mūrtadayārūpa guruvareṇyo vyāt ॥4॥

sadātmadhyānaniratam
viṣayebhyaḥ parāṅmukham ।
naumi śāstreṣu niṣṇātaṃ
candraśekharabhāratīm ॥5॥

विवेकिनं महाप्रज्ञं
धैर्यौदार्यक्षमानिधिम् ।
सदाभिनवपूर्वं तं
विद्यातीर्थगुरुं भजे ॥६॥

अज्ञानां जाह्नवीतीर्थं
विद्यातीर्थं विवेकिनाम् ।
सर्वेषां सुखदं तीर्थं
भारतीतीर्थमाश्रये ॥७॥

विद्याविनयसम्पन्नं
वीतरागं विवेकिनम् ।
वन्दे वेदान्ततत्त्वज्ञं
विधुशेखरभारतीम् ॥८॥

शुक्लाम्बरधरं विष्णुं
शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत्
सर्वविघ्नोपशान्तये ॥९॥

अगजाननपद्मार्कं
गजाननमहर्निशम् ।
अनेकदं तं भक्तानाम्
एकदन्तमुपास्महे ॥१०॥

vivekinaṃ mahāprajñaṃ
dhairyaudāryakṣamānidhim ।
sadābhinavapūrvaṃ taṃ
vidyātīrthaguruṃ bhaje ॥6॥

ajñānāṃ jāhnavītīrthaṃ
vidyātīrthaṃ vivekinām ।
sarveṣāṃ sukhadaṃ tīrthaṃ
bhāratītīrthamāśraye ॥7॥

vidyāvinayasampannaṃ
vītarāgaṃ vivekinam ।
vande vedāntatattvajñaṃ
vidhuśekharabhāratīm ॥8॥

śuklāmbaradharaṃ viṣṇuṃ
śaśivarṇaṃ caturbhujam ।
prasannavadanaṃ dhyāyet
sarvavighnopaśāntaye ॥9॥

agajānanapadmārkaṃ
gajānanamaharniśam ।
anekadaṃ taṃ bhaktānām
ekadantamupāsmahe ॥10॥

वक्रतुण्ड महाकाय
कोटिसूर्यसमप्रभ ।
अविघ्नं कुरु मे देव
सर्वकार्येषु सर्वदा ॥११॥

vakratuṇḍa mahākāya
koṭisūryasamaprabha ।
avighnaṃ kuru me deva
sarvakāryeṣu sarvadā ॥11॥

वागीशाद्याः सुमनसः

vāgīśādyāḥ sumanasaḥ

सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युः
तं नमामि गजाननम् ॥१२॥

sarvārthānāmupakrame ।
yaṃ natvā kṛtakṛtyāḥ syuḥ
taṃ namāmi gajānanam ॥12॥

सरस्वति नमस्तुभ्यं
वरदे कामरूपिणि ।
विद्यारम्भं करिष्यामि
सिद्धिर्भवतु मे सदा ॥१३॥

sarasvati namastubhyaṃ
varade kāmarūpiṇi ।
vidyārambhaṃ kariṣyāmi
siddhirbhavatu me sadā ॥13॥

नमस्ते शारदे देवि
काश्मीरपुरवासिनि ।
त्वामहं प्रार्थये नित्यं
विद्यां बुद्धिं च देहि मे ॥१४॥

namaste śārade devi
kāśmīrapuravāsini ।
tvāmahaṃ prārthaye nityaṃ
vidyāṃ buddhiṃ ca dehi me ॥14॥

शारदा शारदाम्भोज-
वदना वदनाम्बुजे ।
सर्वदा सर्वदास्माकं
सन्निधिं सन्निधिं क्रियात् ॥१५॥

śāradā śāradāmbhoja-
vadanā vadanāmbuje ।
sarvadā sarvadāsmākaṃ
sannidhiṃ sannidhiṃ kriyāt ॥15॥

या देवी सर्वभूतेषु
बुद्धिरूपेण संस्थिता ।
नमस्तस्यै नमस्तस्यै
नमस्तस्यै नमो नमः ॥१६॥

कृष्णाय वासुदेवाय
देवकीनन्दनाय च ।
नन्दगोपकुमाराय
गोविन्दाय नमो नमः ॥१७॥

नमः पङ्कजनाभाय
नमः पङ्कजमालिने ।
नमः पङ्कजनेत्राय
नमस्ते पङ्कजाङ्घ्रये ॥१८॥

हरलीलावताराय
शङ्कराय महौजसे ।
कैवल्यकलनाकल्प-
तरवे गुरवे नमः ॥१९॥

रामाय रामभद्राय
रामचन्द्राय वेधसे ।
रघुनाथाय नाथाय
सीतायाः पतये नमः ॥२०॥

yā devī sarvabhūteṣu
buddhirūpeṇa saṃsthitā ।
namastasyai namastasyai
namastasyai namo namaḥ ॥16॥

kṛṣṇāya vāsudevāya
devakīnandanāya ca ।
nandagopakumārāya
govindāya namo namaḥ ॥17॥

namaḥ paṅkajanābhāya
namaḥ paṅkajamāline ।
namaḥ paṅkajanetrāya
namaste paṅkajāṅghraye ॥18॥

haralīlāvatārāya
śaṅkarāya mahaujase ।
kaivalyakalanākalpa-
tarave gurave namaḥ ॥19॥

rāmāya rāmabhadrāya
rāmacandrāya vedhase ।
raghunāthāya nāthāya
sītāyāḥ pataye namaḥ ॥20॥

हयग्रीव हयग्रीव
हयग्रीवेति यो वदेत् ।
तस्य निस्सरते वाणी
जह्नुकन्याप्रवाहवत् ॥२१॥

hayagrīva hayagrīva
hayagrīveti yo vadet ।
tasya nissarate vāṇī
jahnukanyāpravāhavat ॥21॥

असाध्यसाधक स्वामिन्
असाध्यं तव किं वद ।
रामदूत दयासिन्धो
मत्कार्यं साधय प्रभो ॥२२॥

asādhyasādhaka svāmin
asādhyaṃ tava kiṃ vada ।
rāmadūta dayāsindho
matkāryaṃ sādhaya prabho ॥22॥

विना वेङ्कटेशं न नाथो न नाथः
सदा वेङ्कटेशं स्मरामि स्मरामि ।
हरे वेङ्कटेश प्रसीद प्रसीद प्रियं
वेङ्कटेश प्रयच्छ प्रयच्छ ॥२३॥

vinā veṅkaṭeśaṃ na nātho na nāthaḥ
sadā veṅkaṭeśaṃ smarāmi smarāmi ।
hare veṅkaṭeśa prasīda prasīda priyaṃ
veṅkaṭeśa prayaccha prayaccha ॥23॥

ॐ